
Cover Page

DOI: http://ijmer.in.doi./2021/10.12.92

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :7.816(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:12(5), December: 2021
Online Copy of Article Publication Available: www.ijmer.in
Digital certificate of publication: http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf
Scopus Review ID: A2B96D3ACF3FEA2A
*Article Received: 2nd December*
*Publication Date:31st December 2021*

# लिङ्गपुपाणे वीरभद्रनृसिंहयोः संग्रामः

**Gundi Srinivas**
Ph. D Scholar,
Sanskrit Department, Osmania University
Hyderabad, Telangana State, India

पुराणानि वैष्णवानि ब्रह्मणानि शैवानि इति त्रिधा विभक्तानि। इतरेषां देवानां महत्ववर्णनात्मकान्यपि प्रकीर्णानि वर्तन्ते। तेषु विष्णुप्रतिपादकानि सात्विकानि, शिवप्रतिपादकानि तामसानि इतराणि राजसानि इति त्रिधा पुराणवर्गीकरणमपि पौराणिकैः अङ्गीकृतम्। यथा विष्णुपुराणेषु शिवात् विष्णोराधिक्यं प्रतिपाद्यते तथैव शैवेषु शिवस्याधिक्यं प्रतिपादितं भवत्येव। शिवकेशवयोः भेदप्रतिपादनं तारतम्य विवक्षा वा यद्यपि न पुराणस्याशयः तथापि अर्थवादरूपेण तत्तत्पुराणप्रतिपाद्यदेव-स्याधिक्यवर्णनं भवत्येव।

सात्विकेषु पुराणेषु महात्म्यमधिकं हरेः।
राजसेषु च महात्म्यमधिकं ब्रह्मणो विदुः।।
तद्वदग्नेश्च महात्म्यं तामसेषु शिवस्य च ।
सङ्कीर्णेषु सरस्वत्याः पितृणां च निगद्यते।।[1]

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :7.816(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:12(5), December: 2021
Online Copy of Article Publication Available: www.ijmer.in
Digital certificate of publication: http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf
Scopus Review ID: A2B96D3ACF3FEA2A
*Article Received: 2nd December*
*Publication Date:31st December 2021*

DOI: http://ijmer.in.doi./2021/10.12.92

मस्त्य, कूर्म, लिङ्ग, स्कान्द, वायु, अग्निपुराणानि शैवानि स्मृतानि। वायुपुराणस्थाने केचित् शिवपुराणं पठन्ति। एवं भेदगणनायां वर्तमानायाम् अपि लिङ्गपुराणं शैवमेवेति सर्वसम्मतम्।

पुराणमिदं द्विधा विभक्तम्। पूर्वार्धे 108 अध्यायाः, उत्तरार्धे 55 अध्यायाः सन्ति।

लिङ्गपुराणे पूर्वार्धे पञ्चनवतितमे, षण्णवतितमे च अध्याये नरसिंहावतारकथा प्रस्तावः वर्तते।

नरसिहावतारकथा वर्णनात्मकेषु पुराणेषु श्रीमद्भागवत विष्णुपुराण नारदपुराणानि प्रसिद्धानि। श्रीमद्भागवतकथैव त्रिषु तुल्यरूपा दृश्यते। कूर्मपुराणे लिङ्गपुराणे च पुराणान्तरेषु अदृष्टा भिन्नरूपा नरसिंहावतारकथा वर्तते। विशेषतः लिङ्गपुराणे वीरभद्रनरसिंहयोः संग्रामो वर्णितः। वीरभद्रः शिवांश सम्भवः तेनैव नरसिंहः पराजितः इति वर्णनेन शिवाधिक्य प्रतिपादकमिदनुपाख्यानां पुराणे निबद्धम्।

<u>वीरभद्रोत्पत्तिः</u>

दक्षयज्ञे पितृकृता पराभवेन योगाग्नि दग्धां सतीं दृष्ट्वा ईश्वरः दक्षाय कुपितः। कुपितस्य शिवदेहः अग्निमयो अभूत्। तस्मादेव अग्नेः महाद्युति कश्चन पुरूषः समुत्पन्नः।

Cover Page
DOI: http://ijmer.in.doi./2021/10.12.92
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :7.816(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:12(5), December: 2021
Online Copy of Article Publication Available: www.ijmer.in
Digital certificate of publication: http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December
Publication Date:31st December 2021

रुद्रश्चातीवरुद्रोऽभूद् बहूकोपाग्निदीपितः।
ततस्तत्कोपजाद् वह्नेराविरासीन्महाद्युतिः।
प्रत्यक्षः प्रतिमाकारः कालमृत्युप्रकम्पनः।
उवाच च प्रणम्येशं भुशुण्डीं महतीं दधत्।।[2]

ततः स पुरुषः "किंकरवाणि आज्ञां देहि" इति शिवमुवाच।

आत्मनः पराक्रमं प्रशंसन्तं तं शिवः नाम्ना वीरभद्रं कृतवान्। ईश्वरसैन्याध्यक्षेषु आयमेव एकवीरः इति हेतोः सः वीरभद्रो बभूव। भद्र इति वात्सल्यात्मकं सम्बोधनम्।

महावीरोऽसिरे भद्र मम सर्वगणेष्विह।
वीरभद्राख्यया त्वं हि प्रथितं परमां व्रज।।[3]

शिवेन आज्ञप्तः वीरभद्रः दक्षयज्ञं ध्वस्तं कृतवान्। तदैव विष्णुरपि वीरभद्रेण पराभूतः। किन्तु लिङ्गपुराणे नरसिंहस्य क्रोधोपशमनार्थं नरसिंहावतार उपसंहरणार्थमेव दक्षयज्ञानन्तरमपि वीरभद्रेण निर्वर्तनीयं प्रयोजनम् ईश्वरेण स्मृतमिति वर्णितम्। नरसिंहावतारसमाप्तिरेव वीरभद्रसृष्टेः मुख्यं प्रयोजनम्। दक्षयज्ञध्वंसः गौणमिति लिङ्गपुराणे स्पष्टम्।

Cover Page

DOI: http://ijmer.in.doi./2021/10.12.92

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :7.816(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:12(5), December: 2021
Online Copy of Article Publication Available: www.ijmer.in
Digital certificate of publication: http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December
Publication Date:31st December 2021

लिङ्गपुराणे पञ्चनवतितमे अध्याये हिरण्यकशिपोः वधानन्तरमपि नरसिंहः न शशाम। स्तुतोपि नरसिंहः न शान्तः, नरसिंहस्य भयङ्करनादेन लोकाः वित्रासिताः।

नादैः तस्य नृसिंहस्य घोरैः वित्रासितं जगत्।

आब्रह्म भुवनाद्विप्राः प्रचचाल च सुव्रताः।।[4]

नरसिंहात् भीताः ब्रह्मपुरोगाः सर्वे देवाः आत्मत्राणाय मन्दरस्थं महादेवं शरणं जग्मुः। देवैः बहुधा स्तुतः ईश्वरः तेषामागमनकारणं पप्रच्छ। देवाः एवमूचुः “नारायणः सिंहरूपमास्थाय निखिलं जगत् बाधते त्वं दुष्टानां नियन्ता इदानीं यत्कर्तव्यं तत्कृत्वा अस्मान् रक्षस्व” इति।

तदा ईश्वरः शरभरूपं धृत्वा गर्वितं नरसिंहं दृष्वा तस्य प्राणान् अपहृत्य पुनः नरो भूत्वा यथा स्थानं गतः इति।

अथोत्थाय महादेवः शम्भं रूपमस्थितः।

ययौ प्रति नृसिंहस्य गर्वितस्य मृगाशिनः।।

अपहृत्य तदा प्राणान् शरभः सुरपूजितः।

सिंहात्ततो नरो भूत्वा जगाम च यथाक्रमम्।

एवं स्तुतस्तदा देवैर्जगाम स यथाक्रमम्।।[5]

Cover Page

DOI: http://ijmer.in.doi./2021/10.12.92

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :7.816(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:12(5), December: 2021
Online Copy of Article Publication Available: www.ijmer.in
Digital certificate of publication: http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf
Scopus Review ID: A2B96D3ACF3FEA2A
*Article Received: 2nd December*
*Publication Date:31st December 2021*

एवं संग्रहेण उक्तं श्रुत्वापि ऋषयः कथा श्रवणस्य न तृप्ताः। पुनः तदेव उपाख्यानं विस्तरेण ब्रूहि इति सूतं पप्रच्छुः। सूतः पुनः तमेव विषयं संग्रम वर्णनेन सह विस्तरेण उक्तवान्।

<u>सूत उवाच</u> – देवैः अभ्यर्थितः शिवः वीरभद्रं सस्मार। पूर्वाध्याये महादेवः स्वयं शरभरूपमास्थितः नरसिंहं हतवान् इत्युक्त्वा पुनः वीरभद्रं स्मृतवान् इति विरोधं परिहर्तुं शिववीरभद्रयोः अभेदत्वम् एकरूपत्वं च तत्रैव निरूपितम्।

यत्तेजस्तु नृसिंहाख्यं संहर्तुं परमेश्वरः।
तदर्थं स्मृतवान् रुद्रो वीरभद्रं महाबलम्।।
आत्मनो भैरवं रूपं महाप्रलयकारकम्।
आजगाम पुरा सद्यो गणानामग्रतो हसन्।।[6]

आगतं वीरभद्रं दृष्ट्वा तमेवम् आदिदेश "नरसिंहः अजेयः वर्तते प्रथमं तं साम्ना शमयितुं यत्नं कुरु, यदि न शाम्यति तदा मम सहजं भैरवं रूपं दर्शय। तस्य स्थूलांशान् स्थूलेन तेजसा, सूक्ष्मांशान् सूक्ष्मेण तेजसा शमितान् कुरु तं हत्वा वक्त्रं चर्म च आनेतव्यम्" इति।

ज्वलितः स नृसिंहाग्निः शमयैनं दुरासदम्।
सान्त्वयन् बोधयादौ तं तेन किं नोपशाम्यति।।

Cover Page

DOI: http://ijmer.in.doi./2021/10.12.92

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :7.816(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:12(5), December: 2021
Online Copy of Article Publication Available: www.ijmer.in
Digital certificate of publication: http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December
Publication Date:31st December 2021

ततो मत्परमं भावं भैरवं संप्रदर्शय।

सूक्ष्मं सूक्ष्मेण संहृत्य स्थूलं स्थूलेन तेजसा।

वक्त्रमानय कृत्तिं च वीरभद्र ममाज्ञया।।[7]

एवं शिवेन आज्ञप्तः वीरभद्रः नरसिंहसमीपं गत्वा प्रथमं बहुधा स्तुतवान्। "त्वमेव सर्वभूतानां प्रभावः, प्रभुरव्ययः" इति विष्णुपारम्यमपि अङ्गीकृतवान्।

"यदर्थं नरसिंहरूपं धृतवान् असि तत्प्रयोजनं निरूढं त्वमपि शिवपरायणः देवाः शिवं शरणं गताः शिवाज्ञया अहमत्रागतः इदं भयङ्करं रूपम् उपसंहरः" इति प्रार्थितवान्। तथापि नरसिंहः न शान्तः। नरसिंहः स्वपराक्रम वर्णनेन विकत्थितोऽभूत्।

विश्वाधिकः स्वतन्त्रश्च कर्ता हर्ताखिलेश्वरः।

इदं तु मत्परं तेजः कः पुनः श्रोतुमिच्छति।।

अतो मां शरणं प्राप्य गच्छ त्वं विगतज्वरः।

अवेहि परमं भावमिदं भूतमहेश्वरः।।[8]

एवमादयः दशाधिकाः श्लोकाः तत्र वर्तन्ते। ततः वीरभद्रोपि नरसिंहकृताम् आत्मश्लाघां सोढमुक्षमः तीक्ष्णया गिरा नरसिंहमेवं तर्जितवान्। "त्वम् अहङ्कारेण गर्वेण गर्जसि अहं साक्षात् ईश्वरांश सम्भूतः ईश्वरः पूर्वं कूर्मरूपिणः तव कपालं हृत्वा हारलतायां स्थापितवान्। अपि च वराहावतारे तव अट्टहासः

Cover Page

DOI: http://ijmer.in.doi./2021/10.12.92

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :7.816(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:12(5), December: 2021
Online Copy of Article Publication Available: www.ijmer.in
Digital certificate of publication: http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December
Publication Date:31st December 2021

विष्वक्सेन रूपेण कृतः ईश्वरेण शमितः। त्वया भार आसहिष्णुना दन्ताग्रात् भूः पातिता तव दंष्ट्रा च भग्ना तदा भूमिम् ईश्वरः स्व स्मश्रु केशाग्रे तव दंष्ट्र्या सह धृतवान्।

कुलालचक्रवच्छक्त्या प्रेरितोसि पिनाकिना।

अद्यापि तव निक्षितं कपालं कूर्मरूपिणः ।।

हरहारलतामध्ये मुग्ध कस्मान्न बुध्यसे।

विस्मृतं किं तदंशेन दंष्ट्रोत्पातनपीडीतः।।[9]

एवं बहुधा महेश्वरपराक्रमः वीरभद्रेण निरूपितः। एवं वीरभद्रेण उक्तः नरसिंहः वीरभद्रं अभियुयोध। वीभद्रोपि स्वयं विक्रम्य शरभः भूत्वा पक्षधारी पक्षाभ्यां चुञ्चुना च नरसिंहं प्रहृत्य पराजितं चकार। नरसिंहोपि पराजितः अष्टोत्तरशतनामस्तोत्रेण शिवं स्तुत्वा प्रसादयामास। स्वयं च शान्तः नारसिंहं विहाय वैकुण्ठं जगाम।

तदा तेजांसि सर्वाणि तस्मिन् लीनानि शङ्करे।

ततो व्यक्तो महातेजाव्यक्ते संभवतस्ततः ।।

रूद्रसाधारणं चैव चिह्नित विकृताकृति।

ततः संहाररूपेण सुव्यक्तः परमेश्वरः।।

पश्यतां सर्वदेवानां जयशब्दादि मंगलैः।

Cover Page

DOI: http://ijmer.in.doi./2021/10.12.92

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :7.816(2021); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:12(5), December: 2021
Online Copy of Article Publication Available: www.ijmer.in
Digital certificate of publication: http://ijmer.in/pdf/e-Certificate%20of%20Publication-IJMER.pdf
Scopus Review ID: A2B96D3ACF3FEA2A
*Article Received: 2nd December*
*Publication Date:31st December 2021*

सहस्रबाहुर्जटिलश्चन्द्रार्धकृतशेखरः।।

स मृगर्धशरीरेण पक्षाभ्यां चंञ्चुना द्विजाः।

अतितीक्ष्णाहादंष्ट्रो वज्रतुल्यनखायुधः।।

इदं तु शरभाकारं परं रूपं पिनाकिनः।

प्रकाशितव्यं भक्तेषु चिरेषूद्यमितेषु च ।।[10]

## पादटिप्पणी

1.पुराणपर्यालोचनम् –3-p.no.152.

2.काशीखण्डः – 4-89-18,19.

3.काशीखण्डः – 4-89-30.

4.लिङ्गपुराणम् – 95–18.5.

5.लिङ्गपुराणम् – 95–61,62.

6.लिङ्गपुराणम् – 96–3,4.

7.लिङ्गपुराणम् – 96–13,14.

8.लिङ्गपुराणम् – 96–33,34.

9.लिङ्गपुराणम् – 96–46,47.

10.लिङ्गपुराणम् – 96–64-67.

## उपयुक्तग्रन्थसूची

1. पुराणप्रर्यालोचनम् – चौखाम्बसुरभारती – वारणासी – 2006.
2. काशीखण्डः – सम्पूर्णान्दविश्वविद्यालयः – वारणासी – 1997.
3. लिङ्गपुराणम् – नागपब्लिशर्स – दिल्ली – 2004.